EB

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद –बहिःस्थ**

**परीक्षा :डिसेंबर –२०२३**

**सत्र ४ थे**

**विषय: हर्षचरित आणि ऐहोळेप्रशस्ति(EB–४४०४)**

**दिनांक :०७/१२/२०२३** **गुण : ८०** **वेळ : स. १०.०० ते १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ अ) माध्यमभाषया एकं श्लोकमनुवदत।** **(०५)**

१. वरदातुङ्गतरङ्गरङ्गविलसद्धंसावलीमेखलां वनवासीमवमृद्नतः सुरपुरप्रस्पर्धिनीं सम्पदा।
महता यस्य बलार्णवेन परितः सञ्छादितोर्वी–तलं स्थलदुर्गं जलदुर्गतामिव गतं तत्तक्षणे पश्यताम्।।
२. बाणाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे रणे।
लक्ष्मीर्भावितचापलापि च कृता शौर्येण येनात्मसाद्राजासीज्जयसिंहवल्लभ इति ख्यातश्चलुक्यान्वयः।।

**आ) अनुच्छेदद्वयं माध्यमभाषया अनुवदत।** **(१५)**

१. विवेश च सहसा केसरीव गिरिगुहागृहं गभीरहृदयं भयङ्कर कोपावेगः। केशिनिषूदनशङ्काकुलकालिभङ्गुभ्रूभ्रङ्गतरङ्गिणी स्यामायमाना यमस्वसेव प्रथीयसी ललाटपट्टे बीषणा भ्रुकुटिः उदभिद्यत। दर्पात्परामृशन् नखकिरणसलिलनिर्झरैः समरभारसम्भावनाभिषेकम् इव चकार दिङ्नागकुम्भकूटविकटस्य बाहुशिखरकोशस्य वामः पाणिपल्लवः।

२. तदद्यैव कृतप्रतिज्ञो गृहाण गौडाधिपाधमजीवितध्वस्तये जीवितसंकलनाकुलकालाकाण्डदण्डयात्राचिह्नध्वजं धनुः। न ह्ययमरातिचन्दनचर्चाशिशिरोपचारमन्तरेण साम्यति परिभवानतपच्यमानदेहस्य देवस्य दुःखताहज्वरः सुदारुणः। निकारसन्तापशान्त्युपायपरिक्षयै हि हिडिम्बाचुम्बनास्वादितम् इव रिपुरुधिरामृतम् अमन्दरोपायम् अपायि पवनात्मजेन।

३. ततश्च तथा कृतप्रतिजे प्रयाणं विजयाय दिशां समदिशति देवे हर्, गतायुषां प्रतिसामन्तानामुदवसितेषु बहुरूपाण्युपलिङ्गानि वितेनिरे। तता ह्यविप्रकृष्टाः कालदूतदृष्टय इवेतस्ततश्चटुलाः कृष्णशारश्रेणयः। प्रचलितलक्ष्मीनूपुरप्रणादप्रतिमा मधुसरघासङ्घाताझङ्कारा जहादिरे। चिरं विवृतविकृतवदनविवरविनिःसृतवह्निविसरा वासरेऽपि विरसं विरेसुश्चिरमशिवार्थामशिवाः शिवाः।

**प्र.२ अ) एकां टिप्पर्णी लिखत।** **(०५)**

१. प्रशस्तिकाव्यस्य महत्त्वम्।

२. द्वितीयपुलकेशिनः पूर्वं चालुक्यवंशीयानां राज्ञां पराक्रमः।

**आ) तिस्रः टिप्पणीः लिखत।** **(१५)**

१. सन्ध्यावर्णनम्

२. आरम्भश्लोकौ

३. स्कन्दगुप्तस्य हर्षवर्धनेन सहं भाषणम्

४. अशौचदिवसाः

**प्र.३ अ) एकं वाक्यं ससन्दर्भं स्पष्टीकुरुत।** **(५)**

१. भयविगलितहर्षो येन चाकारि हर्षः।

२. स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः।

**आ) त्रीणि वाक्यानि ससन्दर्भं स्पष्टीकुरुत।** **(१५)**

१. स्कन्दगुप्तो विवेश राजकुलम्।

२. सर्वथा स्वस्ति भवत्वार्याय।

३. मनसा प्रथमतरं गतस्तपोवनमधोमुखस्तूष्णीमवतिष्ठत।

४. परित्यक्तं मया शस्त्रम्।

**प्र.४ अ) एकमुत्तरं सविस्तरं लिखत।** **(५)**

१. कीर्तिवर्मणः पराक्रमं लिखत।

२. ऐहोळेप्रशस्तौ भाषालङ्काराः के के दृश्यन्ते? सोदाहरणं लिखत।

**आ) एकमुत्तरं सविस्तरं लिखत।** **(१५)**

१. सिंहनादस्य भाषणेन हर्षस्य चित्तवृत्तौ कः परिणामः अभवत्?

२. राज्यवर्धनस्य शोकविह्वलामवस्थां लिखित्वा तस्य विरक्तिविचारन् लिखत।

----------